# श्री तपोवन–षट्कम्  śrī tapōvana-ṣaṭkam

(śrī ānandaprakāśa-vidyāprakāśaḥ)

व्याप्तं जगद्येन चिदात्मभावाद् रज्ज्वा यथाऽहिर्हि चराचरं यत् ।
संन्यस्य सर्वं च सदात्मभावे स्वयं समस्तं च बभूव यस्तु ॥
निस्सङ्ग–निर्मुक्तिपदं प्रपद्य ब्रह्मात्मभावेन विराजितो यः ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ १ ॥

vyāptaṁ jagadyēna cidātma-bhāvād rajjvā yatāऽhir-hi carācaraṁ yat |
saṁnyasya sarvaṁ ca sadātma-bhāvē svayaṁ samastaṁ ca babhūva yastu ||
nissaṅga-nirmukti-padaṁ prapadya brahmātma-bhāvēna virājitō yaḥ |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 1 ||

अखण्ड–भावः शिवरूप–तत्त्वः चिति–स्वभावः परमात्मसत्यः ।
सत्यस्य सत्यः सुधियैव गम्यः परः प्रधानात्परमेश्वरो यः ॥
आद्यन्तहीनो निरपेक्ष दीप्तिः स्वतः स्वरूपेण विफुल्लितो यः ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ २ ॥

akhaṇḍa-bhāvaḥ śivarūpa-tattvaḥ citi-svabhāvaḥ paramātma-satyaḥ |
satyasya satyaḥ sudhiyaiva gamyaḥ paraḥ pradhānāt-paramēśvarō yaḥ ||
ādyantahīnō nirapēkṣa dīptiḥ svataḥ svarūpēṇa viphullitō yaḥ |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 2 ||

मन्तुन्न शक्यो मनसा कदाचिद् वक्तुन्न केनापि तथा न वाचा ।
बोद्धुञ्च बुद्ध्यापि तथा न शक्यः बुद्ध्यादि–साक्षी खलु केवलो यः ॥
सर्वेन्द्रियातीत–पदस्थितोऽपि सर्वेन्द्रिय–प्रेरयिता परो यः ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ ३ ॥

mantunna śakyō manasā kadācid vaktunna kēnāpi tathā na vācā |
bōddhuñca buddhyāpi tathā na śakyaḥ buddhyādi-sākṣī khalu kēvalō yaḥ ||
sarvēndriyātīta-pada-sthitōऽpi sarvēndriya-prērayitā parō yaḥ |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 3 ||

शुद्धातिशुद्धञ्च सदा प्रबुद्धः विश्वेश्वरो विश्वपरः प्रसन्नः ।
व्यापी परब्रह्मणि मोदमानः वेदान्त–सारः सुधियां शरण्यः ॥
एको वशी सर्व–भूताधिवासः सर्वाधिपः सर्व–जीवात्मको यः ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ ४ ॥

śuddhāti-śuddhañca sadā prabuddhaḥ viśvēśvarō viśva-paraḥ prasannaḥ |
vyāpī para-brahmaṇi mōdamānaḥ vēdānta-sāraḥ sudhiyāṁ śaraṇyaḥ ||
ēkō vaśī sarva-bhūtādhi-vāsaḥ sarvādhipaḥ sarva-jīvātmakō yaḥ |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 4 ||

अशब्दम्–अस्पर्शम्–अरूपवच्च तथारसं नित्यम्–अगन्धवच्च ।
निरञ्जनं नित्य–निरीहमेकं बुद्धेः परं निर्गुण–सद्ध्रुवञ्च ॥
गुह्यं गभीरं गगनोपमं यं पश्यन्ति निर्धूत–मला यतीन्द्राः ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ ५ ॥

aśabdam-asparśam-arūpavacca tathārasaṁ nityam-agandhavacca |
nirañjanaṁ nitya-nirīham-ēkaṁ buddhēḥ paraṁ nirguṇa-saddhruvañca ||
guhyaṁ gabhīraṁ gaganōpamaṁ yaṁ paśyanti nirdhūta-malā yatīndrāḥ |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 5 ||

तेजोमयं दिव्यम्–अमेयशक्तिं सनातनं शान्तम्–अनामयञ्च ।
अद्वैतम्–आश्चर्यम्–अचिन्त्यरूपं परात्परं नित्यम्–अनन्तमाद्यम् ॥
ज्ञानप्रकाशेन विशुद्ध–सत्त्वः यं पश्यति स्वात्मनि चिन्त्यमानं ।
श्री सौम्य–काशीश–महेश्वराय तस्मै नमः स्वामि–तपोवनाय ॥ ६ ॥

tējōmayaṁ divyam-amēya-śaktiṁ sanātanaṁ śāntam-anāmayañca |
advaitam-āścaryam-acintyarūpaṁ parātparaṁ nityam-anantamādyam ||
jñāna-prakāśēna viśuddha-sattvaḥ yaṁ paśyati svātmani cintyamānam |
śrī saumya-kāśīśa-mahēśvarāya tasmai namaḥ svāmi-tapōvanāya || 6 ||